विष्णुः । इति हलायुधः ॥ (यथा, महाभारते । १३ । १४९ । ११५ ।
"आधारनिलयो धाता पुष्पहासः प्रजागरः ॥"
"संहारसमये सर्व्वाः प्रजा धयति पिबतीति वा धाता । धेट् पाने इति धातुः ।" इति शाङ्कर-भाष्यम्॥ महादेवः । यथा, तत्रैव।१३।१७।१०३।
"धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः ॥")
भृगुमुनिपुत्रः । तस्य भार्य्या मेरुकन्या आयतिः । तस्य सुतः मृकण्डुः तस्य च मार्कण्डेयः । इति श्रीभागवतम् ॥ जनपदध्वंसाद्यनुगतवायुविशेषः । यथा, वह्निपुराणे गणभेदनामाध्याये ।
"धाता दुर्गो धितिर्भीमस्त्वभियुक्तस्त्वपातुसहः । द्युतिर्वपुरनाप्योयवासः क्रामो जयो विराट् ॥ इत्येकोनाश्च पञ्चाशन्मरुतः पूर्व्वसम्भवाः ॥"
( आदित्यविशेषः । यथा, महाभारते । १ । ६५ । १४-१५ ।
"अदित्यां द्वादशादित्याः सम्भूता भुवनेश्वराः । ये राजन् ! नामतस्तांस्ते कीर्त्तयिष्यामि भारत ! ॥
धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च ॥"
ब्रह्मणः पुत्रविशेषः । यथा, महाभारते । १ । ६६ । ५१ ।
"द्वौ पुत्रौ ब्रह्मणस्त्वन्यौ ययोस्तिष्ठति लक्षणम् । लोके धाता विधाता च यौ स्थितौ मनुना सह ॥" )
पालके, त्रि । इति मेदिनी । ते, २७ ॥ धारकः । इति धरणिः ॥

धातुः, पुं, (धीयते सर्व्वमस्मिन्निति । धा + "सितनिगमीति ।" उणां १ । ७० । इति तुन् ।) शरीरधारकवस्तूनि । तद्यथा । कफः । वातः । पित्तम् ।
"शरीरदूषणाद्दोषा मलिनीकरणान्मलाः । धारणाद्धातवस्ते स्युर्वातपित्तकफास्त्रयः ॥"
इति वैद्यकम् ॥
("रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः । सप्त दूष्याः मला मूत्रशकृत्स्वेदादयोऽपि च ॥"
इति वाभटे सूत्रस्थाने प्रथमेऽध्याये ॥
धातुशब्देनात्र शुक्रार्त्तवे अभ्युच्येते तद् यथा ।
"तथाहि पुष्पमुकुलस्थो गन्धो न शक्यमिहास्तीति वक्तुं नैव नास्तीत्यथवास्ति सतां भावानां अभिव्यक्तिरिति ज्ञात्वा केवलं सौक्ष्म्यान्नाभिव्यज्यते स एव गन्धो विवृतपत्रकेशरैः कालान्तरेणाभिव्यक्तिं गच्छत्येवं बालानामपि वयः परिणामात् शुक्रप्रादुर्भावो भवति रोमराज्यादयोऽर्त्तवादयश्च विशेषा नारीणां रजसि चोपचीयमाने शनैः शनैः स्तनगर्भाशययोन्यभिवृद्धिर्भवति । स एवान्नरसो वृद्धानां जरापक्वशरीरत्वान्न प्रीणनो भवति । त एते शरीरधारणाद्धातव इत्युच्यन्ते ।" इति सुश्रुते सूत्रस्थाने १४ अध्यायः ॥
अथ धातुशब्दस्य निरुक्तिमाह ।
"इति सप्त स्वयं स्थित्वा देहन्दधति यन्नृणाम् । रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः ॥"
अथ धातूनां कर्म्माण्याह ।
"प्रीणनं जीवनं लेपः स्नेहो धारणपूरणे । गर्भोत्पादश्च कर्म्माणि धातूनां कथितानि हि ॥"
इति च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) रसः । रक्तम् । मांसम् । मेदः । अस्थि । मज्जा । शुक्रम् । महाभूतानि । तद्यथा । पृथिवी । जलम् । तेजः । वायुः । आकाशः । तद्गुणाः यथा । गन्धः । रसः । रूपम् । स्पर्शः । शब्दः । इन्द्रियाणि यथा । चक्षुः । श्रोत्रम् । घ्राणम् । जिह्वा । त्वक् ॥ अश्मविकृतिः । सा तु गैरिकमनःशिलादि । ( यथा, कुमारे । १ । ४ ।
"अकालसन्ध्यामिव धातुमत्ताम् ॥")
शब्दयोनिः । सा च साधुशब्दप्रकृतिः । भूपचपठप्रभृतिः । स्वर्णादिः । इत्यमरभरतौ ॥ * ॥
यथा, शब्दमालायाम् ।
"सुवर्णरूप्यमाणिक्यहरितालमनःशिलाः । गैरिकाञ्जनकासीससीसलोहाः सहिङ्गुलाः ॥ गन्धकोऽभ्रकमित्याद्या धातवो गिरिसम्भवाः ॥"
नव धातवो यथा, सुखबोधे ।
"हेमतारारनागाश्च ताम्रवङ्गे च तीक्ष्णकम् । कांस्यकं कान्तलौहञ्च धातवो नव कीर्त्तिताः ॥"
अष्टधातवो यथा, दानसागरे ।
"हिरण्यं रजतं कांस्यं ताम्रं सीसकमेव च । रङ्गमायसरैत्यञ्च धातवोऽष्टौ प्रकीर्त्तिताः ॥"
अपि च वैद्यके ।
"सुवर्णं रजतं ताम्रं लौहं कृष्णञ्च पारदम् । वङ्गञ्च सीसकञ्चैव इत्यष्टौ देवसम्भवाः ॥"
सप्तधातवो यथा, भावप्रकाशे ।
"स्वर्णं रूप्यञ्च ताम्रञ्च रङ्गं यशदमेव च । सीसं लौहञ्च सप्तैते धातवो गिरिसम्भवाः ॥"
ताम्राद्युत्पत्तिर्यथा,—
"शृणु तत्त्वेन मे भूमे ! कथ्यमानं मयानघे ! । एकाग्रं चित्तमाधाय येन ताम्रं मम प्रियम् ॥ पूर्व्वं कमलपत्राक्षि ! गुडाकेशो महासुरः । ताम्ररूपं समादाय ममैवाराधने रतः ॥ तत्र दृष्ट्वा मया प्रोक्तं प्रसन्नेनान्तरात्मना । गुडाकेश ! महाभाग ब्रूहि किं करवाणि ते ॥ चक्रेण वधमिच्छामि त्वया मुक्तेन केशव ! । वैशाखस्य तु मासस्य शुक्लपक्षे तु द्वादशीम् ॥ मम तेजोमयं चक्रं वाधयिष्यत्यसंशयम् ।
तदैव चक्रेण विपाटितोऽसौ
प्राप्तोऽपि मां भागवतप्रधानः ॥
ताम्रन्तु तन्मांसमभूत्सुवर्ण-
मस्थीनि रूप्यं बहुधातवश्च ।
रङ्गञ्च सीसं त्रपुधातुसंस्थं
कांस्यञ्च रीतिश्च मलस्तु तेषाम् ॥
एतद्भागवतैः कार्य्यं मम प्रियकरैः सदा । एवं ताम्रं समुत्पन्नमिति मे रोचते हि तत् ॥"
इति वराहपुराणम् ॥ * ॥
"हरितालं हरेर्वीर्य्यं लक्ष्मीवीर्य्यं मनःशिला । पारदं शिववीर्य्यं स्यात् गन्धकं पार्व्वतीरजः ॥"
इति वैद्यकम् ॥ * ॥
सप्तोपधातवो यथा,—
"माक्षिकं तुत्थिकाभ्रे च नीलाञ्जनशिलालकाः । रसकश्चेति विज्ञेया एते सप्तोपधातवः ॥" * ॥
शरीरस्थसप्तधातुभवसप्तोपधातवो यथा,—
"स्तन्यं रजश्च नारीणां काले भवति गच्छति । शुद्धमांसभवः स्नेहो यः सा संकीर्त्यते वसा ॥ स्वेदो दन्तास्तथा केशास्तथैवौजश्च सप्तमम् । इति धातुभवा ज्ञेया एते सप्तोपधातवः ॥"
इति सुखबोधः ॥

धातुकासीसं, क्ली, (धातुरूपं कासीसम् ।) कासीसम् । इति हेमचन्द्रः । ४ । १२२ ॥ ( पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।
"कासीसं धातुकासीसं हरितं तच्च लोहितम् ॥")

धातुघ्नं, क्ली, ( धातुं स्वर्णादिकं हन्तीति । हन + टक् । ) काञ्जिकम् । इति हेमचन्द्रः ।३।६०॥

धातुनाशनं, क्ली, ( धातुं स्वर्णादिकं नाशयतीति । नश् + णिच् + ल्युः ।) काञ्जिकम् । इति त्रिकाण्डशेषः ॥

धातुपः, पुं, ( धातुं अस्थिमज्जामांसोत्पादकपदार्थविशेषं पाति रक्षतीति । पा + कः । ) शरीरस्थप्रथमधातुः । रस इति ख्यातः । इति शब्दचन्द्रिका ॥

धातुपुष्पिका, स्त्री, ( धातुरिव पुष्पं यस्याः । जातौ ङीष् । स्वार्थे कन् पूर्व्वह्रस्वः । यद्वा कप् । टापि अत इत्वम् । ) धातृपुष्पिका । इति शब्दरत्नावली । धाइफुल् इति भाषा ॥

धातुपुष्पी, स्त्री, ( धातुरिव पुष्पमस्याः । जातित्वात् ङीष् । ) धातकी । इति भावप्रकाशः ॥

धातुभृत्, पुं, ( धातुं गैरिकादिकं बिभर्त्तीति । भृ + क्विप् । तुगागमश्च । ) पर्व्वतः । इति शब्दरत्नावली ॥ धातुपोषके, त्रि ॥

धातुमाक्षिकं, क्ली, (धातुरूपं माक्षिकम् ।) माक्षिकम् । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।
"माक्षिकं धातुमाक्षिकं ताप्यं ताप्युत्थसंज्ञकम्॥")

धातुमारिणी, स्त्री, (धातुं सुवर्णादिकं मारयतीति । मृ + णिच् + णिनि + ङीप् ।) सर्ज्जिका । इति शब्दचन्द्रिका । सोहागा इति भाषा ॥

धातुराजकं, क्ली, ( धातुषु राजते इति । राज + ण्वुल् । यद्वा, धातूनां राजा इति समासान्त टच् । ततः स्वार्थे कन् । ) रेतः । इति शब्दचन्द्रिका ॥

धातुवल्लभं, क्ली, ( धातुषु वल्लभम् । ) टङ्कणम् । इति राजनिर्घण्टः ॥ ( टङ्कणशब्देऽस्य गुणादिकं ज्ञेयम् ॥)

धातुवादी, [ न् ] पुं, ( धातुं वदति उपायान्तरेण कर्त्तुं कथयतीति । वद + णिनिः ।) कारन्धमी । इति हारावली । १६५ ॥

धातुवैरी, [ न् ] पुं, (धातूनां वैरीव दूषकत्वात् ।) गन्धकः । इति शब्दचन्द्रिका ॥

धातुशेखरं, क्ली, ( धातूनामुपधातूनां शेखरमिव श्रेष्ठत्वात् । ) कासीसम् । इति हेमचन्द्रः । ४ । १२२ ॥